This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/



॥केशवपद्धतिपत्रं॥ ७॥

Accession No: ~~2243~~ M1287

Title:- केशवपद्धति

Subject:- ज्योतिष

Author:- केशव

Date:- शके 1696.

पत्रे - 76

①

KKSU LIBRARY
RAMTEK
441 106
M-1287
Dist Nagpur

Checked 2012

७॥ श्रीवरदमूर्तये नमः॥ श्रीगुरुमूर्तये नमः॥ श्रीसरस्वत्यै नमः॥ ७॥ श्रीगणेशं नमस्कृत्य केशवार्य
नामपद्धतेः॥ गणितं विश्वनाथेन क्रियते बालबुद्धये॥१॥ नत्वा विघ्नपशारदाच्युतशिवब्रह्मार्क
मुख्यग्रहान् कुर्वे जातकपद्धतिं स्फुटतरां होराविदां प्रीतये॥ यंत्रैः स्पष्टतरोत्र जन्मसमयो वेद्यो ऽत्र
खेटाः स्फुटा यत्पक्षे हि घटंत उद्गम इहास्तर्क्षेश सषड्गः स च॥२॥ अहं केशवः जातकपद्धतिं कुर्वे
जातकस्येदं जातकं जातस्य जातकस्य जन्मांतरार्जितसदसत्कर्मस्य जनितशुभाशुभफलनि
रूपकं शास्त्रं जातकमित्युच्यते॥ जातकशास्त्रे यानि कर्माणि गणितक्रियास्तेषां पद्धतिं मार्गं कुर्वे
किं कृत्वा॥ नत्वा॥ कान्॥ विघ्नपशारदाच्युतशिवब्रह्मार्कमुख्यग्रहान्॥ विघ्नपः श्रीमहागणपतिः
शारदा श्रीसरस्वती॥ अच्युतः श्रीनारायणः॥ शिवो श्रीमहादेवः॥ ब्रह्मा चतुराननः॥ अर्कमुख्य
ग्रहाः श्रीसूर्यादयो नवग्रहाः॥ एतान्नत्वा जातकपद्धतिं कुर्वे॥ कथंभूतां जातकपद्धतिं स्फुटतरां

प्रस्फुटार्थः॥ कस्यै॥ ज्योतिर्विदां प्रीतये॥ ज्योतींषि ग्रहनक्षत्रादीनि विदंतीति ते ज्योतिर्विदः तेषां
प्रीतये॥ अत्र जन्मसमयः स्पष्टतरः सूक्ष्मवेध्यो ज्ञातव्यः॥ कैः यंत्रैः घटीशंकुफलकादिभिः॥ अ
त्र जन्मसमये खेटाः स्फुटाः वेद्याः॥ ते खेटाः यस्पक्षेण घटंते तथा सुगणकेन वेद्याः॥ श्रीमत्के
शवदैवज्ञैः विद्यमानघटनामवलोक्य साधितास्ते गणेशज्योतिर्विद्भिः ग्रहलाघवे निबद्धाः ते
यथा॥ सौरोऽर्कोऽपि विधूच्चमंककलिकोनाभोगुरुस्त्वार्यजोऽस्त्याहूचकजं ज्ञकेंद्रकमथा
येत्रेषुभागः ज्ञानिः॥ शौक्रं केंद्रमथार्यमध्यमगतीर्यंयांति दृक्तुल्यतां॥ सिद्धैस्तैरिह पर्वधर्म
नयसत्कार्यादिकं खादिसेत्॥ १॥ इह जन्मसमये उद्गमः लग्नं सोध्यं॥ स्वोदये सउद्गमः सषड्भ
षड्राशियुक्तोऽस्तर्क्षं सप्तमभावो भवति॥ अथ उदाहरणक्रमो लिख्यते॥ संवत् १६४३ शालि
वाहन शाके १५०८ आषाढशुद्ध ७ सोमे घटी ३३ पलानि ६ उत्तराफाल्गुनी नक्षत्रं घटी ४

२

पलानि १२ व्यतीपातयोगघटिकाः ११ पलानि ३५ अत्रश्रीसूर्योदयाद्गतघटीषु ५१ पलेषु २८
रात्रिगतघटिकाः १८ पलेषु ४० जन्मदिनमानं घटिकाः ३२ पलानि ४८ रात्रिमानघटिकाः २७
पलानि १२ अयनभागाः ७।४४२० अक्षभा ४ चरखंडानि ४०॥३२॥१३ चरंऋणं ८४ देशांत
रयोजनानि धनानि ४ अथमध्यमग्रहसाधनार्थं अहर्गणो लिख्यते। तत्र कल्यात् स्पष्टः क
ल्पितश्चगताब्दगण्यदिनगणस्य च ज्ञानार्थं सुगमोपाये ह्ह ज्योतिर्विदां श्लोकत्रयं। तद्यथा
करद्वाररयुगससाभ्राभ्रषट्वह्निषट्खद्वितुरग ७२०६३६०७४५२ सहितश्चै कलतुल्यद्युपिं
डः इहस्स भवति कल्यात हृद्काद्रि भूमी नगयुगखगपक्षांकभद्युकु १९७२९८७७ ९ शाकोद्धाः
१॥ द्वारसयुगाभ्रषट्नागरामाभ्रवेदांबुधिशशीनगयुक्तो ७१४४०३८६१३६५ ब्रह्मतुलद्युपिं
डः॥ इहसमभवतिस्पष्टे श्चाथगेहषष्टिरामाष्टभुजगशिखानां केंदु १९५५८८३७ युक्ताः शाको

ध्रु॰ ॥२॥ नागरामनगवेदषट्‌शरक्ष्मा १५६४७३८ युतो द्युगणः कुतूहले स्यादयं कलियुगरेवा
स्थगो द्विभूराम ३१७९ संयुते शाकोत्र वत्सराः ॥३॥ अंसलु स्यद्युपिंडः २४७३०५ केरशरयुगस
सा द्विभिः रे भिरं वैः १९७२९४३१७९ युतः शाकः १५०८ जातं कल्प द्युतोगताब्दाः १९७२९४८९८७
एवं शररसयुगा द्विभिः ७१४४०३८९१३९५ युतोऽहर्गणः २४७३०५ जातस्पष्टलरहर्गणः ७१४४०
४००८६७० तथागोसष्टिरामाद्विभिः १९५५८८३१७९ युतः शाकः १५०८ जातः सृष्टिगताब्दाः ॥

उ.	सू.	चं.	मं.	बु.	गु.	शु.	श.	रा.	के.
११ ११ ३५ ५३	२ १४ १२ २४	५ १२ २५ ३८	० २४ ४० [illegible]	६ [illegible] [illegible] ३७	२ २ १० ४८	० २५ ३९ २२	० १४ २३ १६	६ ५ ३० ४	० ५ ३० ४
५१	५९ ५८	७९० ३५	३१ २६	१६ २४	५ ०	७ ०	३ ०	३१	३१

[illegible]			
	मे	२३८	मी
	वृ	२६७	कुं
	मि	३१०	म
	क	३३६	ध
	सि	३३१	वृ
	क	३१८	तु

सू.	चं.	मं.	बु.	गु.	शु.	श.	रा.	के.
२ १४ २० ५८	५ १२ २५ ३२	१ २१ ४५ ४६	२ १३ ३१ ४२	२ ८ ३५ ४	२ २५ १३ ५४	० १३ ३८ ५२	६ ५ २० ४	० ५ २० ४
५९	[illegible]	३१	५५	५	३१	४०	३१	३१

③

॥३॥

१९५५८८।६८७ एवं भागरामगुणाद्रिभिः १५६४८७३८ युभौमाहर्गणः १४७३०५ स्यात॥ कलेर्गताब्दाः॥
४६८७॥ अथोदयांतरचरदेशांतरभुजफलसंस्कृताः स्तात्कालिकमध्यमग्रहा रव्यादयो लिख्यंते
अथ स्पष्टतराः॥ अथ रवोदये लग्नं साध्यं तत्साधनमुच्यते अस्मत्तुल्ये। तद्यथा। तात्कालिकार्कायनभाग
युक्तस्तद्भोग्यभोगैरुदयाहतस्य॥ खाग्न्युद्धृतस्तं रविभोग्यकालं विशोधयेदिष्टघटीपलेभ्यः॥१॥ तद
द्ग्रोदयानाश्चशुद्धान् शेषमशुद्धहृत्खाग्निगुणं लवाद्यं॥ अशुद्धपूर्वैर्भवनैरजाद्यैर्युक्तं तनुः स्यादयनां
शहीनः॥२॥ भोग्याल्पकाले खगुणाहतेर्कः स्वीयोदयाप्तांशयुतो विलग्नं॥ अथ लग्नादिष्टकालसाध
नं॥ अर्कस्य भोग्यस्तनुभुक्तयुक्तो मध्योदयाढ्यः समयो विलग्नात्॥३॥ यद्येकभे लग्नरवी तदा तद्भागांतर
घ्नोदयखाग्निभागः रात्रेष्टकाले तु सषड्भसूर्याल्लग्नं ततो प्युक्तवदिष्टकालः॥४॥ अत्रोदाहरणं॥ तात्का
लिकोर्कः २।१४।२०।५८ रात्रौ जन्म इति कारणात्सषड्भः ८।१४।२०।५८। अयनभागाः २२ ४४ युक्तः
९।२।८।५८। अस्य भोग्यभागैः २७।५।२ मकरस्योदयेगुणितः॥ खाग्न्युद्धृतश्च ७० जातो भोग्यकालः
३१०

पलाद्य: २८८।२८।४०॥ अथइष्टकालस्यपलेभ्य: ११२० भोग्यकाले २८८।२८।४० शोधिते शेषं ८३१।३१।२०। मकरादये कुंभोदये २६७ मीनोदये २३८ शेषात् शोधिते शेषं ८८।३१।२० मेषादये वृषभोदय: २६७ अयंन शुध्यति अत: शेषं ८८।३१।२० खाग्निगुणितं २६५५।४० अशुद्धोदयेन २६७ भक्तं लब्धं लवाद्यं फलं ९।५६।४६॥ मेषादशुद्धपर्यंतराशिषट्कयुतंससमलग्नं ६।२२।१२।४६ अथदशमलग्नसाधनं॥ लंकोदयैर्नतोन्नतसाधनं॥ रात्रेरिति॥ रात्रे: शेषमितं युतं दिनदलेनाल्पोगतं शेषकं विश्लेष्यं खलु पूर्वपश्चिमनतं त्रिंशच्युतं चोन्नतं॥ यत्पूर्वंनतषड्गुणक्षरविते: पश्चान्नताढ्यस्य तोयल्लंकोदयकैश्चलग्नमिवतन्माध्यं स षड्गं सुखं॥२॥ नतंचतुर्द्धा॥ दिवा पूर्वपश्चिमं॥ रात्रौ पूर्वपश्चिमं॥ अर्द्धरात्रादुपरि रात्रिशेषं दिनदलेनयुतं कार्यं रात्रौ पूर्वनतं स्यात्॥ अर्द्धरात्रात्प्राक् रात्रिगतं॥ दिनदलेनयु[illegible]तं कार्यं रात्रौ पश्चिमनतं स्यात्॥ दिनार्द्धात्प्राक् अन्हः गतं दिनदलेन

विश्लेष्यं दिनार्द्धात्संशोधिते दिवसे पूर्वनते स्यात्॥ दिनार्द्धदुपरि दिनशेषं दिनार्द्धात्संशोधितं
दिवसे पश्चिमनतं स्यात्॥ नतं त्रिंशच्युतं [illegible]मोन्नतं स्यात्॥ दशमभावसाधने पूर्वे उन्नतेस
उन्नतमिष्टकालं प्रकल्प्य॥ षड्भुतात्कालिकार्कसूर्यं प्रकल्प्य॥ लंकोदयैः लग्नवल्लग्नं साध्यं तन्मा
ध्यं दशमभवनं स्यात्॥ सषड्भं रात्रिशेषद्भयुतं सुखं चतुर्थभावो भवति॥ पश्चिमनते नतमिष्टका
कालं प्रकल्प्य तात्कालिकसूर्यद्दुक्रवल्लग्नं साध्यं॥ लंकोदयैः तदेव दशमलग्नं रात्रिशेषद्भयुतं च

मेष	२७८	॥मीन॥
वृषभ	२९९	॥कुंभ॥
मिथु.	३२३	मकर॥
कर्क	३२३	॥धन॥
सिंह	२९९	॥वृश्चिक
कन्या	२७८	॥तुला

तुर्थभावो भवति॥ अस्योदाहरणं॥ रात्रिगतघटी १८।४० रात्रिमानं २७।१२
रहितं जातं रात्रिशेषं ८।३२ दिनदलेन १६।२४ युतं २४।५६ जातं पूर्वनतं त्रिंश
३०च्युतं जातं पूर्वोन्नतं ५।४ अयमेवेष्टकालः ५।४ सषड्भस्सूर्यः ८।१४।२०।५८
तात्कालिकार्कद्वया दिनाभोग्यकालः पलाद्यः ३००।३४।३१ उत्क्रवज्ज्ञातं
लग्नं ४।१२।३६।३१ इदमेव दशमलग्नं इदं सषड्भं जातं ~~दशमलग्नं~~ चतुर्थल

ग्नं ३।१२।३६।३७ एवं भावचतुष्टये सिद्धे तदंतराष्टभावसाधनं ॥ त्र्यंशेति० व्यस्तखभस्य त्र्यंशा: विग
गते अस्तलग्नं यस्मात्तत्र व्यस्तं व्यस्तं च ततखभं च व्यस्तखभं खभं नाम दशमभवनं व्यस्तखभस्य त्र्यं
शा: तृतीयांशो राश्यादि: ससप्तमरहितदशमस्य त्र्यंशो राश्यादिर्ग्राह्य इत्यर्थ: ॥ उदाहरणं ॥ सप्तमलग्ने
६।२२।१२।४६ दशमलग्नात् शोधिते शेषं २।२०।२३।५१ शेषस्य त्र्यंशा: ०।२६।४७।५७ भू१यम२
हतस्तनौ योज्य: एकगुण: ०।२६।४७।५७ लग्ने ०।२२।१२।४६ योजित: जातो द्वितीयभाव: १।१९।०।
४३ ॥ अन्यत्र द्विगुणो १।२३।३५।५४ लग्ने योजित: जातस्तृतीयभाव: २।१५।४८।४० एवं द्वितीयतृती
यौ स्त: ॥ त्र्यंशो ०।२६।४७।५७ द्विच्युतो द्वाभ्यां २ शोधितो १।३।१२।३ भूयमहतो बंधौ ४ योज्य: एक
गुण: १।३।१२।३ चतुर्थभावे ३।१२।३६।३७ योजित: पंचमभाव: स्यात् ४।१५।४८।४० अन्यत्र द्वि
गुणो २।६।२४।४ चतुर्थभावे योजित: षष्ठभाव: ५।१९।०।४३ एवं पंचमषष्ठौ स्त: एते द्वितीयतृती
यचतुर्थभावा: सांगभा: ६ राशियुक्ता: क्रमेणाष्टमनवमैकादशद्वादशा भावा: स्यु: एवं तनुमुखा:

॥५॥

द्वादशभावाः भवंति संधिरिति द्वयोर्भावयोर्योगार्द्धं संधिः स्यात् ॥ तद्यथा लग्न द्वितीययोर्योगार्द्धं
लग्नस्य विरामसंधिः ॥ धनभावस्यारंभसंधिः ॥ भावद्वययोगकरणे चक्राधिकतया चक्रं नस्या
ज्यं ॥ किंच ॥ यत्प्रथमभावे एकाद्यारात्रिभवनानि स्युः अग्रिमभावे पूर्णं स्यात् तदा पूर्णे ने द्वादशां
ग्राह्यं एवं बुद्धिमता ज्ञेयं ॥ अथ लग्न चतुर्थयोः सिद्धौ यथा सर्वे भावाः ससंधयो युगपदेव त्रिाध्यं
ति ॥ तथायं प्रकारो लिख्यते ॥ लग्नं चतुर्थात् संशोध्य शेषं षष्ठं तन्नो क्षिपेत् ॥ सलग्न धनयोः स्सं
धि एवं यावच्चतुर्थकं ॥ २ ॥ रूपा १ संशोध्य षष्ठांशं निक्षिपेत्तं चतुर्थके ॥ ३ क्रमेण षड्भावाः प्र
जाताः ससंधयः ३ एवं जाताः सर्वे संधिभावाः एकत्र लिख्यंते ॥ संधितुल्ये ग्रहे शून्यं फलमिति
भावसमे ग्रहे संपूर्णं रूपं बलं स्यात् ॥ अंतरे अनुपातः ॥ संधिखगांतरं भावसंध्यंतरेणाप्तं ल ग्रहस्य
भावफलं स्यात् ॥ भावान्यूने ग्रहे सति तस्य भावस्यारंभसंधिना सह अंतरं कार्यं ॥ फलं क्षयचयेहे

५

तनु	धन	ध·		स·		सु·		सु		रि	
० २२ १२ ४९	१ ५ ३६ ४४	१ १९ ० ४३	२ २ २४ ४१	२ १५ ४८ ४०	२ २९ १२ ३८	३ १२ ३६ ३७	३ २९ १२ ३८	४ १५ ४८ ४०	५ २ २४ ४१	५ १९ ० ४३	६ ५ ३६ ४४
जा		मृ		ध·		क		आ		व्य	
६ २२ १२ ४९	७ ५ ३६ ४४	७ १९ ० ४३	८ २ २४ ४१	८ १५ ४८ ४०	८ २९ १२ ३८	९ १२ ३६ ३७	९ २९ १२ ३८	१० १५ ४८ ४०	११ २ २४ ४१	११ १९ ० ४३	० ५ ३६ ४४

यं॥ भावाधिके क्षयफलं॥ भावान्न्यूने चयफलं तदुक्तं मोदरपद्धतौ॥ भावोनकः खगः पूर्वसंधिना रहितस्तदा॥ अधिकश्चेद्विरामाख्यसंध्यतोध्येस्तदंतरं॥ भावसंध्यंतरेणासत द्भावफमुच्यते॥ तदारोहं पूर्वसंधेरवरोहं तथांतिमादिति॥ अथ आरोहावरोहानां उदाहरणं॥ रविः २।१४।२०।५८ संधिखगांतरं ०।११।५६।१७ सवर्णितं भाज्यभाजकौ॥ भाज्यः ४२९१७ भाजकः ४८२३९ भाजकेन भक्ते भाज्ये लब्धं रवे भावफलं ०।५३।२७ चयसंज्ञं॥ भावाद्ग्रहस्य न्यूनत्वात् एवं चंद्रादीनामपि ज्ञेयं॥ आरोहावरोहात्मकानि भावफलानि लिख्यंते॥ अथ भावकुंड

6

॥ श्री ॥

॥इयं भावकुंडलिका लिख्य



॥इयं जन्मकुंडलिका ॥७॥



॥ग्रहाणामारोहावरोहबलचक्रं॥

सू	चं	मं	बु	गु	शु	श
०	०	०	०	०	०	०
५३	३६	३७	३९	२७	३७	२९
३७	२२	४०	५६	३८	३८	२
च०	च०	क्ष०	च०	च०	क्ष०	चय

लिकानिर्णयः ग्रहे भावाधिके सति विरामसंधेः सकाशात्न्यूने अधिके सति अग्रिमभावफलं ददाति ग्रहे भावान्न्यूने सति आरंभसंधेः सकाशादूने सति गतभावफलं ददाति। ग्रहे भावाधिके सति विरामसंधेः सकाशादूने सति तद्भावयथास्थित एव॥ ग्रहे भावादूने सति आरंभसंधेः सकाशादधिके सति तद्भावयथास्थित एव॥ अत्र तत्कालमित्रामित्रचक्रे केंद्रादिविचारे तत्तुंगखले दृष्ट्वा क्रमेणांत दृष्ट्वा क्रमेण चलग्नकुंडलीसकाशाद्विचारः॥ नतु भावकुंडलीसकाशाद्भावफलमेव नतु बलसाधने

॥ श्री ॥

पंक्तिः × संस्कार्य्यः कथं परक्षये हीनः कार्यः परच्छेदो युक्तः कार्यः ॥ अत्र परः हीनास्ति अतः कारणात्त्वेन भादिर्ज्ञो के ×

॥ इति श्रीकेशवदैवज्ञविरचितपद्धतिसहकृते भावाध्यायोदाहरणं ॥ अथ दृष्ट्यानयनमाह ॥ ४

१	२	३	४	५	६	७	८	९	१०	११	१२
०	१	३	२	०	४	३	२	१	०	०	०
	श	मं	गु			मं	गु	त्रो			
	४	४	४			४	४	४			

रेवस्त्रो ग्निद्विखवेद रामयाभस्वाभ्राभ्रमेकादिभेद का
दृष्टावर्जिति द्व्रेयकस्य गुरुणा चेद्दृष्टवेदहता ॥ मंदेनां
कयमेस्त जान ग्रगुणैका भादिज्ञासस्फुला भागध्न
क्षयवृद्धिरवानलल्लवेना ब्ध्युध्दता द्रकू भवेत् ॥ ४
दृष्टावर्जितद्व्रयकस्य एकोदिनेएव मोरभ्यद्रा
पर्यंतमेरात्रौ त्रोषे सति भादिज्ञाः रेवरवाद्यो काः यथाक्रमं स्युः ॥ तद्यथा एकभेरवद्विभे एकद्व्यादिपंचय
लीति दृष्टास्त्री नाहीं द्व्रयः द्व्रयः एवद्व्रयः अत्रोदाहरणं दृष्टा ॥ ५ । १२ । २५ । ३२ द्व्रयोरविः २ । १४ ॥
२० । ५८ अयं दृष्टा हीनो जातः ३ । १ । ५५ । २८ नवराश्यधोकः १ स्वाराश्यधोकः ० अनयोरंतरं क्षयः
१ अनयोरंतरेण भागाद्यं गुणितं १ । ५५ । २८ त्रिंशद्भिर्भक्तं लब्धं ० । ३ । ५० अनेन भादिज्ञो कः हीनः

दृतः ०।५६।१० चतुर्भक्तः जातः सूर्यस्योपरि चंद्रदृष्टिः ०।१४।२ अथ भौमगुरुशनीनां विशेषोस्ति
चैकुतरण दृष्टा सप्तमवर्जितद्रव्यकस्य अष्टमे ८ चतुर्थे ४ वेदाः चत्वारो ४ कास्याच्चाहान पूर्वोक्तः
मंदेन दृष्टावर्जितद्रव्यकस्य नवमे ९ द्विमे २ चत्वारो कः ४ स्यान्न पूर्वोक्तः॥ भौमे दृष्टावर्जितद्र
व्यकस्य सप्तमे ७ त्रिमे २ चत्वारो कः ४ स्यान्न पूर्वोक्तः॥ अस्योदाहरणं दृष्टा शनिः॥ द्वयोरवि
चा १९।४।२०।५८ अयं दृष्टा हीनो जातः २।०।४२।६ मंदेनोकयमे ६।२ हताइस्य क्षोभ्याद्विजो का
श्चत्वारः ४ अग्रेरामाः २ अनयोरंतरं क्षयः १ भागे ०।४२।६ गुणितः ०।४२।६ अस्य खानल
३० लवः ०।१।२४ क्षयस्य विद्यमानत्वात् अनेन भाद्विजोंकः ४।२ रहितः ३।५८।३६ चतुर्भक्तः
जातः सूर्योपरि शनि दृष्टिः ०।५९।३९ भौमगुरुशनीनां अन्यविशेषोस्ति॥ अस्योदाहरणं दृष्टा
गुरुः २।८।३५।९ द्रव्यश्चंद्रः ५।१२।२५।३२ अयं दृष्टा हीनो जातः ३।३।५०।२७ ततीयराद्वयो

क ७ चतुर्थराश्यधोंकः २ अयंनग्रह्यः तत्रचत्वार ४ एवग्राह्याः अनयोरंतरं १ भागाद्येनगुणि
तं ३।५०।३२ त्रिंशद्भिः ३० भक्तं लब्धं ०।७।४० अनेनभा।द्जोंकः ३ युक्तः ३।७।४० चतुर्थेनयुक्तः ओ
तष्यंशोपरिगुरुदृष्टिः ०।४६।५५ एवंचंद्रादीनांग्रहभावदृष्टिसाधनं ॥ इतिश्रीदिनाकरदैवज्ञात्मज
विश्वनाथदैवज्ञविरचिते जातकपद्धत्युदाहरणे दृष्टिसाधनाध्यायोदाहरणम् ॥ ७ ॥ छ
अथग्रहाणांबलाबलज्ञानंविनासर्वत्रजातके फलनिर्णयोदशाक्रमफलनिर्णयोप्यकर्तुंनशक्यः
अतोबलसाधनाध्यायआरभ्यते ॥ तद्बलंस्थानदिक्कालनिसर्गचेष्टादृष्टिभिः षड्विधं ॥
तत्रस्थानबलंपंचधा ॥ उच्चबलं १ सप्तवर्गजबलं २ समविषमराशिनवांशबलबलं २ केंद्रादिग
णबलं ४ पुरुषनपुंसकस्त्रीग्रहाणांआदिमध्यांतेद्रेष्काणबलं ५ एवंपंचधा ५ तत्रादावुच्चब
लमाह ॥ नीचोनइति ॥ नीचोनोभगणच्युतः षडधिकश्चेत्खषड्हृद्दोच्चंबलं स्वर्क्षेर्द्धसमभेष्टम

श्री	र	चं	मं	बु	गु	शु	श		त	ध	स	सु	सू	रि	जा	म	ध	क	आ	व्य	
सू		० १५ १३	० ० ०	० ० ०	० ० ०	० ० ०	० ० २१	सू	० ० ०	० ० ०	० ० ०	० ० ०	० २६ २८	० १५ २५	० २१ १२	० २२ २२	० ५६ १६	० १५ १३	० २२ १६	० १२ २०	सू
चं	० १४		० २६ २०	० २६ २८	० १६ ५३	० २६ २६	० २६ २८	चं	० ५५	० २६ २२	० १२ १२	० ० ०	० ० ०	० ० ०	० ५५ १३	० १९ ५५	० १२ २८	० २८ ५५	० ५६ ५८	० ५१ ५२	चं
मं	० ० ०	० ० ०		० ० ०	० ० ०	० २ ५४	० ० १०	मं	० ० ०	० ० ०	० ० ०	० १२ २५	० ५५ १५	० २२ ५५	० ० ५२	० ५५ २५	० १ ०	० १ १	० ७ ५८	० १२ १२	मं
बु	० १ १	० ५३ १३	० ० ०	० ० ०	० ० ०	० ० ०	० ० ०	बु	० ० ०	० ० ०	० ० ०	० ० ०	० २५ १९	० २५ १५	० २२ १२	० २ २८	० ५६ १८	० २५ १३	० २८ १२	० १३ ५२	बु
गु	० ० ०	० ५५ ५५	० ० ०	० ० ०		० ० ०	० ० ०	गु	० ० ०	० ० ०	० ० ०	० २ ०	० २२ १३	० ५ १४	० २२ ५५	० २ १५	० ५६ १३	० ३ ०	० ५९ १९	० १ १३	गु
शु	० ० ०	४ २२ १२	० ० ०	० ० ०	० ० ०		० ४ ७	शु	० १६	० ० ०	० ० ०	० ० ०	० १० ०	० ३६ ५५	० ३६ ३६	० २६ १३	० ५२ १२	० ५१ ११	० १९ ५२	० २८ ५२	शु
श	० ५१ २९	० ७ १३	० १३ २०	० २५ ५५	० ५१ ५३	० ५१ १२		श	० ० ०	० १ २	० २८ ५२	० १८ १७	० ३ ५०	० १ २२	० ५४ ५३	० २२ १२	० २२ १२	० ५८ ३०	० ० ०	० ० ०	श

स्विचरणं
मूलत्रिको
णेवलं
मित्रक्षेत्रि
रथोच्चे मे
त्रयुइ भो
ग्गौवैरिभे
स्थंत्राको
हितांग्गोध्य
रिमेग्रहा
दिपवत्त्वा

खेटस्य सैसैक्यजं ॥५॥ नीचोनइति ॥ ग्रहः नीचेन ऊनः कार्यः षड्धिकश्चेत्तर्हि भगणात् १२ च्यु
तः द्वादशराशिभ्यः शोधितः ॥ चेत्षड्भादल्पः तर्हि यथास्थित एवेत्यर्थसिद्धं ॥ राश्यादिकः षट्
हृतः औच्चं उच्चबलं स्यात् ॥ अथ भाजनप्रकारः ॥ यदा नीचोनग्रहस्य संपूर्णाः षड्राशयस्तदा
षड्भ ६ हृतेः रूपं १ बलं स्यात् ॥ यदा षड्भोल्पः तदा रूपस्थाने प्रथमं शून्यं ग्राह्यं तद्राशयः षष्ट्यागु
ण्याः अधोभागाद्यं द्विगुणितं कृत्वा संयोज्य पुनः षड्भक्तं ६ कार्यं तदुच्चबलं स्यात् ॥ तत्र ग्रहाणा
मुच्चनीचानि बृहज्जातके उक्तानि तद्यथा ॥ अज १ वृष २ मृगा १० गना ६ कुलीरा ४ झष १२
वणिजौ च दिवाकरादितुंगाः ॥ दश १० शिखि ३ मनुयुक २८ तिथीद्रियांशै १५।५ स्त्रिनवक २७
विंशति २० भिश्च तेस्तनीचाः ॥१॥ रव्यादीनां नीचानि ॥ अस्योदाहरणं नि ॥ रविः २।१४।२०।
५८ नीचं ६।१० नीचोनरविः ८।४।२०।५८ अयं षड्भाधिकोऽस्ति अतो भगणात् १२ च्युतः ३

२५॥३९।२ षड्भ६त्तं लब्धं रूपस्थाने शून्यं ० शेषं षष्टि ६० गुणितं द्वि२ गुणिताधस्थांकेन युतं
२३०॥३९।२ षड्भ६त्तं लब्धं द्वितीयफलं ३८ शेषं षष्टि ६० गुणितं द्विगुणेन अधस्थांकेन युतं
१९८।२ षड्भ६त्तं लब्धं तृतीयफलं ३३ शेषं षष्टि ६० गुणितं द्विगुणेन २ अधस्थांकेन युतं षड्भ६त्तं लब्धं चतुर्थफलं ० एवं चंद्रादीनामपि॥

॥अथ ग्रहाणामुच्चबलचक्रं

र	चं	मं	बु	गु	शु	श
० ८ ३३ ०	० २६ ५१ २१	० २२ ४ ४४	० २१ ३० ३८	० ५१ ११ ४३	० ३० ३५ २२	० २ ३ २

र	चं	मं	बु	गु	शु	श	श्री
०	१	९	५	३	११	६	उ
१०	३	२८	१५	५	२७	२०	च्चं
६ १०	७ ३	३ २८	११ १५	९ ५	५ २७	० २०	नीचं

अथ सप्तवर्गजबलान्याह॥ स्वर्क्षे द्वामिति ०॥ स्वभवने ग्रहेऽर्द्धं ०।३० फलं स्यात्॥ समभे समराशौ अष्टमांशः ०।७।३०॥ मूलत्रिकोणे त्रयश्चरणाः ०।४५।० मित्रर्क्षे

मित्रवर्गे मित्रराशौ अधिः चरणः ०।१५।० अधीष्टभे अधिमित्रगृहे त्र्यः ३६ भांशाः ८ बलं ० २२
३० वैरिभे शत्रुराशौ उरष्ट्यं १९ शोकः षोडशांशाः ० ३ ४५ अध्यरिभे अधिशत्रुगृहे दंतो अंशाः
०।५२।३० रूपस्येति सर्वत्र ह्येयं गृहादिषवर्गो खेटस्य गृहाधिपवर्गाधिपानां यथास्थानोक्तानि
स्वर्क्षेद्दमित्यादीनि सप्तबलानि ग्राह्याणि तेषां समानामैक्यजं बलं सप्तवर्गबलं भवति॥ एतदुक्तं
२५ भवति॥ ग्रहो यस्मिन्गृहेऽस्ति तद्गृहस्वामिनं स्वक्षीद्युक्तबलं ग्राह्यं एवं होरादिस्वामिनां ग्राह्यं॥ अ
त्र केचन ग्राहोन्नेतु बलं त्रिकोणग्रह इति ग्रहस्य ग्रहस्थानादेव अष्टमं बलं गृह्णन्ति तद्युक्तं सप्तव
र्गमिति॥ सप्तसंख्यानि यस्मात् मूलत्रिकोणे चेत्स्यग्रहो भवति तदा तद्गृहस्थाने मूलत्रिकोणजं बलं
लं ग्राह्यं स्वक्षीद्युक्तं न ग्राह्यं गृहादिषवर्गात् खेटस्य सप्तैक्यजमित्यत्र केचिदेवं व्याकुर्वते त्रि
यमाने बलस्य गृहादिसप्तवर्गस्थायादृशास्तादृशास्य स्वर्क्षेद्द समभेष्ट इत्याद्युक्तरीत्या बलं ग्रा

ह्यमिति तदसत्॥ आचार्यैर्ग्रहाधिपवचात्स्वर्क्षसमभे ग्राह्यमित्युक्तं तेन ग्रहादिवर्गस्वामी स्वर्क्षा
दिषु यद्गृहेऽस्ति तदुच्चबलं ग्राह्यमिति प्रतीयते अन्यथा वक्ष्यमानाऽश्रयउणकेयः स्वाधीशसु
हृत्समार्यधिरिपोर्गृहे वर्गपतीसादिचतुंस्यात् अत्र न तु वर्गग्रहणं ग्रहर्क्षभपदानां ग्रहणानादन
तरोक्तव्याख्यैव साध्वी॥ यतो ग्रहर्क्षभपदानां ग्रहेवचास्यता॥ न होरादिषतः क्रियमाणबलस्य ग्रहादि
वर्गस्वामिनो यादृग्ग्रहे संति तादृशं बलं ग्राह्यमिति उचितं दृश्यते मूलत्रिकोणानि बृहज्जातके त
यथा॥ सिंहो ५ वृषः २ प्रथम १ षष्ठ ६ हयांग ९ तौलि ७ कुंभा ११ स्त्रिकोणभवनानि भवंति सूर्यात्॥ उच्च
मूलत्रिकोणानि स्वभवनसंदेहे कल्याणवर्म्मा निर्णयमाह॥ विंशति २० भागाः सिंहे त्रिकोणम
परे स्वभवनमर्कस्य उच्चं भागत्रितयं ३ वृषेंदोः स्यात्त्रिकोणमपरेंशाः॥ द्वादश भागा मेषे त्रि
कोणमपरे स्वमंतु भौमस्य॥ उच्चफलं कन्यायां बुधस्य तुंगांशकैः सदा चिंत्यं॥ परतस्त्रिकोणजा

तं पंचभि ५ रंशैः स्वराशिजं परः॥ दशभि भागै र्जीवस्य त्रिकोणफलं स्वभं २० परं चापे॥ शुक्रस्य
तुलि तिथयोंशा १५ स्त्रिकोणमपरे घटे स्वराशिः स्यात्कुंभे त्रिकोण निज मेरविजस्य रवेर्यथा सिंह॥
अथ सप्तवर्गजफलार्थं स्वाभाविकमैत्र्याद्यो ज्ञेयाः॥ ते च बृहज्जातके उक्ताः॥ शत्रू मंद सितौ स
मश्च शशिजो मित्राणि शेषा रवेस्तीक्ष्णांशुर्हिमरश्मिजश्च सुहृदौ शेषाः समाः शीतगोः॥ जी
वेंदूष्णकरा कुजस्य सुहृदो ज्ञोरी सितार्की समौ मित्रे सूर्यसितौ बुधस्य हिमगुः शत्रुः समश्चा
परे॥१॥ सूरेः सौम्यसितावरी रविसुतो मध्यो परे त्वंन्यथा सौम्यार्की सुहृदौ समौ कुजगुरू शुक्रस्य शे
षावरी॥ शुक्रज्ञौ सुहृदौ समः सुरगुरुः सौरस्य चान्ये रयः स्तत्काले च दशा १० य ११ बंधु ४ सहज ३
स्वांते २ । १२ धि मित्रे स्थिताः। २ ये प्रोक्तास्सुहृदस्त्रिकोणभवनास्ते मी मया कीर्तिताः॥ अथाधिमि
त्राद्यो ज्ञेयाः॥ ते च अन्योन्यस्य धन २ व्य १२ याय ११ सहज ३ व्यापार १० बंधुस्थिताः ४ स्तत्कालं

११

॥ सूर्यादीनां त्रिकोणस्थानानि ॥

र	चं	मं	बु	गु	शु	श
५	२	१	६	९	७	११
२०	३	१२	१५	२०	३७	७

सुहृदः स्वतुंगभवनेप्येके रयस्त्वन्यथा ग्रहाणां ये धनव्ययायसहजव्यापा
रबंधुस्थितास्ते तत्काले सुहृदो भवंति ॥ अनुच्चस्थानस्थाः शत्रवो भवंति
२ १२ ११ ३ ४ १० अस्योदाहरणं ॥ सूर्याच्चंद्रो चतुर्थः उच्चस्थाने स्थितः

रविः	चंद्रः	भौमः	बुधः	गुरुः	शुक्रः	शनिः	॥ श्री ॥
चं मं गु	र बु	र चं गु	र शु	सू चं मं	बु श	बु शु	मित्राः
बु	मं शु गु श	शु श	मं गु श	श	गु मं	गु	समाः
शु श	०	बु	चं	बु शु	र चं	र चं मं	शत्रवः

रविः	चंद्रः	भौमः	बुधः	गुरुः	शुक्रः	शनिः	॥ श्री ॥
चंद्र मं श	सू बु गु शु	र बु गु शु श	चं मं श	चंद्र भौम शनि	चंद्र भौम शनि	र मं बु गु शु	मित्रः
बुध गुरु शुक्र	भौमः शनिः	चं	सूर्य गुरु शुक्र	सूर्य बुध शुक्र	सूर्य बुध शुक्र	चंद्र	शत्रुः

११



अतो मित्रं ॥ सूर्यात्तराशिः एकादशोस्ति अतो मित्रं बुधगुरुशुक्राः अनुक्तस्थानस्थाः
अतो शत्रवः ॥ एवं चंद्रादीनामपि ज्ञेयं ॥ इदं तत्कालमित्रामित्रचक्रं ॥ तत्कालेपु
नस्तानधिसुहृन्मित्रादिभिः कल्पयेद्दिसस्य फलितोर्थः ॥ तत्कालमैत्र्यां नि
सर्गमैत्र्यां यः मित्रे सः अधिमित्रं स्यात् ॥ द्वयोः सकाशाच्छत्रुः सः अधिशत्रुः
ज्ञेयः ॥ मित्रशत्रुत्वे समो ज्ञेयः ॥ मित्रसमत्वे मित्रं ॥ शत्रुसमत्वे शत्रुः ॥ अस्योदाहरणं ॥ अथ सप्त
वर्गबलार्थं तावदधिमित्रादयो ज्ञेयाः ॥ ते च अन्योन्यस्य धनव्ययायसहज्जव्यापारबंधुस्थितास्त
त्कालसुहृद इति प्रोक्ताः ॥ यत्तु तुल्यलग्नाद्व्यादयः केषु स्थानेषु संति इति ज्ञानार्थं यथा लग्नाद्भावाः
साधितास्तथा सूर्याच्चंद्रादयः केषु स्थानेषु संति इति ज्ञानार्थं सूर्यात् भावाः साध्याः ॥ तत्र रव्यादीनां भा
वसाधनं यथा ॥ स्पष्ट एव रविः कल्प्यः तस्माच्चरमानीय रात्रिदलं कार्यं तमिष्टकालं प्रकल्प्य लंकोदयैः

लग्नं साध्यं तच्चतुर्थभावो भवति सषड्भाधिको दशमभावो भवति ग्रहः प्रथमभावो भवति ॥
षड्भाधिकः सप्तमभावो भवति ॥ एतेभ्यश्चतुर्भ्यः प्राग्वद्भावसंधिसाधनं ॥ अत एव शिवदास
नाम्ना जातकमुक्तावल्यां ग्रहभावसाधनमुक्तं ॥ तद्वाक्यं ॥ एवं ग्रहेभ्यस्तत्स्वरूपखंडैः सूर्याद्य
थावत्समयं विदित्वा ॥ रविद्युमानेन नताद्याङ्कसाध्यं ॥ स्वभं ततः प्रोक्तवदेव भावाः ॥ यद्वा ग्रहे
भ्यस्तत्स्वरूपकेभ्यः निशार्द्धमभ्रोद्दिवसाध्वनीयं ॥ तन्नाडिकाभिः द्युचराद्विलग्नं स्यात्ततो भा
वाविधिर्विधेयः ॥ प्रयोजनं त्वस्य दशाक्रमाहोकेंद्रादृगानामवबोधनं च ॥ तत्कालमैत्र्यादिद्युचा
त्रसम्यक्फलेयं बुधैर्यौक्तिकसंमतत्वादिति ॥ तन्न प्रामाणिकैस्त्रिविक्रमनीलकंठश्रीपतिभिर
नुक्तत्वात् ॥ अथ सप्तवर्गजचक्रं तत्र सप्तवर्गस्वरूपं ग्रहहोराद्रेष्काणसप्तमांशनवमांशद्वाद
शांशास्त्रिंशांशाश्चेति तत्र ग्रहनवांशस्वामिनः ॥ क्षितिजसितज्ञचंद्ररविसौम्यसितावनि

सू:	चं:	भौम	बुध	गुरुः	शुक्र	शनि	॥श्री॥
चंद्र भौम:	रवि बुध	रगु	∷	चंमं	श	शुबु	अधि मित्र
∷	गुरु शुक्र	शुं शौ	मं श	श	मं	गु	मित्र
गुरुः शनिः	बुं बु	चंबु	रचं गु	सू	चंबु	सू मं	सम
बुधः	मं श	∷	गु	∷	गु	∷	शत्रु
शुक्र	⁝	∷	∷	बुभृ	सू	चं	अधि शत्रुः

ज्ञा: शुरगुरुसौरि गुरुश्च गरलो शकपा: ॥ राशीन्
यां शास्वामिनः ॥ अथ होराद्रेष्काण द्वादशांश त्रिं
शांशाकथनं ॥ सूर्येंदो विषमेग्रहे समगृहे होरेशा
शांकार्कयो: ॥ द्रे: काणा: प्रथम १ पंच ५ नवपानां
ई स्वात् ॥ द्वि षड्क्षांशका: ॥ भूपुत्रार्कि गुरुज्ञ भा
र्गवलवा पंचे ५ षु ५ भा ८ द्रि ७ षव ५ स्त्रिंशांशा वि
षमे कुरात्रिंबुबुधे प्रोक्ता समे ष्कुक्रमात् ॥ ग्रहे वि
षमराशौ पंचदशभागेभ्यो १५ ल्वे सति होरास्वामी
सूर्यः ॥ होरेशा: विषमराशौ गृहे पंचदश १५ भा
गाधिके सति होरास्वामी चंद्रः ॥ एवं समराशौ चंद्रे पंचदश १५ भागेभ्यो धिके सति होरास्वामी

13

॥७२॥

अथ मेषादिद्वादशराशीनामधिपास्युः॥ छ॥ अथ होरा॥ सम॥ द्रेष्काणः॥ ॥

मे	वृ	मि	क	सिं	क	तु	वृ	ध	म	कुं	मी	सू	चं	—	चं	सू	१	५	९
मं	शु	बु	चं	र	बु	शु	मं	गु	श	श	गु	१५	३०		१५	३०	१०	२०	३०

चंद्रः समराशौ पंचदश १५ भागेभ्यो धिके सति। होरास्वामी सूर्यः॥ अथ भागाः प्रथमत्रिभागे १० चेत्तदा स्वराशिपतिरेव द्रेष्काणपतिः द्वितीये त्रिभागे सति २० स्वराशेः सकाशात् पंचमो राशिः तस्य पतिः एव द्रेष्काणपतिः॥ तृतीये त्रिभागे ३० चेत्तदा स्वराशेः सकाशात् यः नवमो ९ राशिः तस्य पतिरेव द्रेष्काणपतिः॥ विषमराशौ स्वरासे स्याछमे सप्तमराशितः॥ सप्तमांशाः समाख्याताः वेदांशाः सप्तलिप्तिकाः ४।१७॥ विषमराशौ स्वराशितः॥ [illegible] ग्रहे सति अनेन सप्तमांशेन ४।१७ स्वराशेः सकाशात् यः सप्तमो राशिः तत्सकाशात् सप्तमांशपतिर्ज्ञेयः॥ अथ नवांशाः॥ आद्याः नवांशाः क्षेत्रेषु क्रियनक्रतौलिककुलीराद्याः नवांशाः क्रमात्॥ मेषसिंहधनुषि स्थिते ग्रहे अनेन ३।२० नवमांशमानेन मेषात् गणनाक्रमः॥ वृषकन्यामकरस्थिते ग्रहे मकराद्गणनाक्रमः॥ मिथुनतुलामकरस्थिते ग्रहे तुलाद्गणनाक्रमः कर्क

॥७२॥

॥ग्रहाणं सप्तमांशचक्रं

१	२	३	४	५	६	७
४ १७	८ ३४	१२ ५१	१७ ८	२१ २५	२५ ४२	२९ ५९

॥ग्रहाणां नवमांश चक्रम्॥

१	२	३	४	५	६	७	८	९
३ २०	६ ४०	१० ०	१३ २०	१६ ४०	२० ०	२३ २०	२६ ४०	३० ०

॥अथ मेषादिद्वादशराशीनां द्वादशांशाः

१	२	३	४	५	६	७	८	९	१०	११	१२
२ ३०	५ ०	७ ३०	१० ०	१२ ३०	१५ ०	१७ ३०	२० ०	२२ ३०	२५ ०	२७ ३०	३० ०

॥त्रिंशांशचक्रं लिख्य

मं	श	गु	बु	शु
५	५	८	७	५
शु	बु	गु	श	मं
५	७	८	५	५

॥नवांशचक्रम्

मे	म	तु	क
सिं	वृ	मि	क
सिं	क	तु	वृ
ध	म	कुं	मी

मीनवृश्चिक स्थितग्रहे कर्कादिगणनाक्रमः ॥ ॥त्रिंशांशा विषमराशौ ग्रहे सति अयं गणनाक्रमः । समराशौ चेत्तर्हि अयं गणनाक्रमः ॥ अथ द्वादशांशाः ॥ अनेन द्वादशांशमानेन २।३० स्वराशेः सकाशात् गणनाक्रमः

॥ अथ सप्तवर्गबलार्थं पूर्वोक्तानि बलानि लिख्यंते ॥

अथ सप्तवर्गबलोदाहरणं । रवेर्ग्रहा धीशो बुधः स्व

क्षेत्रेस्तितेनरूपार्द्धं २०।४८ हेवलं होरेत्वोर रविः सः शत्रुक्षेत्रेस्ति अतोषोडशांशांबलं ॥०।३।४५॥

भी	सू	चं	मं	बु	गु	शु	श
ग्रह	बुश त्रु	बुअ मित्र	शुमि त्र	स्व	गुअ धिश	बुध सम	भौम सम
होरा	स्व	चस्व गृह	रअ. मित्र	सूर्य सम	सूर्य सम	चंद्र सम	सूर्य सम
द्रे.का	भश्र अरा	श० शत्रु	शा. मित्र	शु. सम	बुअ शत्रु	शौअ मित्र	सूर्य सम
सप्त	बुश त्रु	शु मित्र	स्व	बुध स्व	सूर्य सम	मंमि त्र	चअ. शत्रु
नवांश	श. सम	मं. शत्रु	चं. सम	श. मित्र	गुरु स्व	शुक्र स्व	सू. सम
द्वाद.	मंअ मित्र	श. शत्रु	श. मित्र	मं. मित्र	बुअ शत्रु	मं. मित्र	बुअ मित्र
त्रिंशांश	गुरु सम	गुरु सम	शनि मित्र	गुरु शत्रु	शनि मित्र	शुक्र स्व	गुरु मित्र

	त	ध	स	सु	सु	रि	जा	मृ	ध	क	आ	व्य
ग्रह	मं	शु	बु	चं	सू	बु	शु	मं	गु	श	श	गु
होरा	चं	सू	चं	चं	चं	र	चं	र	चं	चं	चं	सू
द्रे.	र	बु	शु	मं	र	श	बु	र	मं	शु	गु	चं
स.	बु	गु	बु	गु	मं	चं	गु	बु	गु	शु	बु	चं
नवमांश	सू.	बु	श	सू	सू	बु	मं	गु	सू	मं	श	गु
द्वा.	गु	गु	गु	गु	श	मं	बु	बु	बु	बु	सू	शु
त्रिं	बु	गु	गु	गु	गु	गु	बु	गु	गु	गु	गु	गु

सप्तमांशाधीशो बुधः स्वक्षेत्रेऽस्ति तेन रूपार्द्धबलं ०।३०।० नवमांशाधीशः शनिः सः समग्रहेऽस्ति तेन अष्टमांशं बलं ०।७।३० द्वादशांशापतिर्भौमः स्वमित्रगृहे वर्त्तते तेन चतुर्थांशं बलं त्रिंशांशापतिर्गुरुः अधिशत्रुभेऽस्ति तेन द्वतांशं बलं ०।१।५२ एवं चंद्रादीनामपि ज्ञेयं॥ अथ युग्मायुग्मबलं चाह॥ युग्मौजेष्विति॥ युग्मेंदू समभांशके हि विषमेन्येददुरंघ्रिं बलं केंद्राद्येषु च रूपकार्द्ध चरणान्यछंति खेटाः क्रमात्॥ स्त्रीखेटौ चरमे नराः प्रथमके क्लीबो च मध्ये तथा द्रेःकाणे विचरंति पादमुदिते स्थास्थानवीर्यं विदुः॥ ५

उच्चबलं	मूलत्रि	स्वगृह	अधिमित्र	मित्र	सम	शत्रु	अधिशत्रु	नीचं
१	०	०	०	०	०	०	०	०
०	४५	३०	२२	१५	७	३	१	०
०	०	०	३०	०	३०	४५	५२	०

॥ग्रहाणां ससैक्यबलचक्रम्							॥अथ युग्मायुग्मबलं						
र	चं	मं	बु	गु	शु	श	र	चं	मं	बु	गु	शु	श
१	१	१	१	१	०	१	०	०	०	०	०	०	०
३५	३१	१	३५	४६	३५	२०	१५	१५	१५	१५	१५	१५	१५
३७	५२	१५	३७	५२	०	३०	०	०	०	०	०	०	०

समभेंशके वा स्थितौ शुक्रेंदू अंघ्रिं रूपांघ्रिं बलं दत्तः ॥ विषमभेंशके वा अन्ये रविभौबुधगु
रुशनैश्चराः अंघ्रिं बलं ददतुः ॥ भं च अंशकश्च भांशकं इत्यत्र द्वंद्वैकवद्भावः ॥ समं च त
द्भांशकं च समभांशकं तस्मिन्समं स्त्रिभवनं विषमं पुरुषं ॥ अत्र श्रीपतिटीकाकारे
ण अंशो मुख्यामुख्यत्वमुक्तं तदसत् ॥ यतः सर्वेषांजातकराणां मतं न स्यात् ॥ उक्तं च लघुजातके
चंद्रशितौ स्त्रीक्षेत्रे पुरुषक्षेत्रोपगाः शेषा इति ॥ एवं अन्येष्वपि ग्रंथेषु दैवे रात्रिरेव ॥ रात्रौ समे
रांशस्ततांशोपि बलं स्यात् ॥ यद्वितयोः रात्रिनवांशाश्चेति द्वयमपि संमतं ॥ तिलदातदा एकश्चरण
यं बलं चरणद्वयबलं ॥ अथ केंद्रादिबलं ॥ केंद्रेति ॥ केंद्राद्येषु केंद्रपणफरआपोक्लिमेषु स्थिताः ग्र
हाः क्रमेण रूपार्द्धं ३० चरण १५ न्येच्छंति ॥ तद्यथा ॥ यो ग्रहः केंद्रे १।४।७।१० तस्य रूपं बलं
१ यः ग्रहः पणफर २।५।८।११ तस्य रूपार्द्धं बलं ०।३०।० अथ यः ग्रहः आपोक्लिमे ३।६।९।१२

	सू॰	चं॰	मं॰	बु॰	गु॰	शु॰	श॰	
ग्रह	० ३० ०	० ३० ०	० ३० ०	० ३० ०	० ३० ०	० ३० ०	० १५ ०	ग्रहालि
होरा	० ३ ४५	० २२ ३०	० ३ ४५	० ३ ४५	० ३ ४५	० २२ ३०	० ३ ४५	॥होरा॥
द्रेष्काण	० ७ ३०	० ७ ३०	० ७ ३०	० ७ ३०	० ३० ०	० ७ ३०	० ३ ४५	द्रे:काण
सप्तमांशा	० ३० ०	० ७ ३०	० १५ ०	० ३० ०	० ३ ४५	० १५ ०	० २२ ३०	सप्तमां॰
नवमांशा:	० ७ ३०	० १५ ०	० २२ ३०	० ७ ३०	० १ ५२	० ७ ३०	० ३ ४५	नवांशाः
द्वादशांशा	० १५ ०	० ७ ३०	० ७ ३०	० १५ ०	० ३० ०	० १५ ०	० ३० ०	द्वादशांश
त्रिंशांशा:	० १ ५२	० १ ५२	० ७ ३०	० १ ५२	० ७ ३०	० ७ ३०	० १ ५२	त्रिंशांशाः

अथग्रहाणांकेंद्रादिबलचक्रं॥

र	चं	मं	बु	गु	शु	श
० १५ ०	० १५ ०	० ३० ०	० १५ ०	० १५ ०	० १५ ०	१ ० ०

तस्योरूपचरणांशोबलं ० १५ ० ज्ञेयं केंद्रादिस्वरूपमुक्तंचहज्जातकोत यथा कंटककेंद्रचतुष्टयसंज्ञासेस ७ लग्न १ चतुर्थ ४ खमाना १० केंद्रासरंपणफरं परतश्च सर्वमापोक्लिमइति अस्योदाहरणं केंद्रेशनिः तस्यरूपंबलं १ पणफरे भौमस्तस्य रूपार्द्धबलं ०।३०।० आपोक्लिमे रविचंद्रबुधगुरुशुक्रास्तेषां पादबलं लिख्यते न्यासः॥

16

॥१६॥

अथद्रेःकाणबलं। स्त्रीखेटाविति० स्त्रीखेटौ चंद्रसितौ चरमे तृतीयद्रेःकाणे यदि भवतिचेत्तर्हि तयो
र्बलं रूपचतुर्थांशो भवति ०।१५।०। एवं नरग्रहाः रविभौमगुरवाः प्रथमद्रेष्काणे यदि संभवंति चेत्तर्हि
रूपचतुर्थांशबलं ०।१५।० यछंति। एवं नपुंसकग्रहौ बुधशनैश्चरौ द्वितीयद्रेःकाणे भवतश्चेत्तर्हि पादंब
लं ०।१५।० यछंति। इदं पंचविधं स्थानबलमुक्तमिदं। स्त्रीग्रहादिस्वरूपमुक्तमिदं। तद्यथा बृहज्जातके
बुधसूर्यसुतौ नपुंसकाख्यौ शशिशुक्रौ युवती नराश्च शेषाः॥ अथउदाहरणं॥ शुक्रः तृतीयद्रेःकाणे
ऽस्ति अतः पादबलं ०।१५।०॥ गुरुः॥ प्रथमद्रेःकाणे सति अतः पादो बलं ०।१५।० बुधो मध्ये द्रेःकाणेऽ
स्ति अतः पादो बलं ०।१५।० इति द्रेःकाणबलम्॥ मंदाल्लग्नमिति० मंदाल्लग्नमिना कुजाच्च हिबुके शो
ध्यं विधोर्भागवात् माध्यं स्याद्गुरुतोस्तमत्र रसभात्तुष्टं त्यजेच्चक्रतः॥ दिग्वीर्यं रस ६ हृत्वथो समपजं रू
पं सहस्याद्विदंश्चिरांशुभ्रक्तैनतोन्नते शशिकुजार्कीणां परेषां बले॥७॥ मंदात् शनैश्चराल्लग्नं शो

॥१६॥

ध्यं॥ इनात् सूर्यात् कुजात् भौमात् हिबुकं चतुर्थभावः शोध्यः॥ ज्ञात् बुधात् गुरोश्च अस्तं
सप्तमभावः शोध्यः॥ शेषं रसभात् पृष्ठं षड्भाधिकं चेत् चक्रात् १२ त्यजेत् द्वादशराशिभ्यः त्यजेदित्यर्थः॥
षड्भाल्पे यथास्थित एव॥ तद्भत्रयाप्तं षड्घ्नः ६ भाऽद्यं रूपाद्यं दिग्वीर्यं दिग्बलं भवतीत्यर्थः॥ अत्र भा
जनप्रकारस्तु उच्चबलानयने प्रागुक्तः॥ सोऽत्र ज्ञेयः॥ उदाहरणं॥ लग्नं ०।२२।१२।४९ मंदात् ०
१३।३८।५२ शोधितं ११।२१।२६।९ इदं रसभात् पृष्ठं॥ अतो भगणाच्च्युतं: ०।८।३८।५४ रस ६ हृल्ल
ब्धं रो नि दिग्बलं ०।२।५१ एवं सर्वेषां जातानि दिग्बलानि॥ अथ दिग्बलानि न्यासः॥ अथ काल
बलचक्रं चतुर्धा॥ नतोन्नतबलं॥ पक्षबलं दिनरात्रिषु त्रिभागबलं॥ स्वहोरादिनमासाब्द
बलं॥ तत्रादौ नतोन्नतबलमाह॥ अथेति॥ अथो दिग्बलानंतरं समयजं कालबलमुच्यते इति॥

॥२७॥

ग्रहाणांस्त्रीनपुंसकादिबलचक्रं

र	चं	मं	बु	गु	शु	श
०	०	०	०	०	०	०
०	०	०	१५	१५	१५	१५
०	०	०	०	०	०	०

॥पंचानांयोगे स्थानबलं॥

र	चं	मं	बु	गु	शु	श
२	२	२	२	३	३	२
४४	१८	३	५०	३३	३५	५२
१०	१२	१९	८	४	२२	४४
३०	५४	४४	४०	१२		३२

अथ रव्यादिग्रहाणां दिग्बलचक्रं॰

र	चं	मं	बु	गु	शु	श
०	०	०	०	०	०	०
९	४०	१६	४२	४४	५४	२
२५	३	५६	५३	३२	१२	५१

ग्रहाणांनतोन्नतबलचक्रम्॥

र	चं	मं	बु	गु	शु	श
०	०	०	१	०	०	०
१०	४९	४९	०	२०	१०	४९
८	५२	५२	०	८	८	५२

अत्र विदो बुधस्य सदा दिवारात्रौ रूपमेव बलं स्यात्॥ नते त्रिंशो ३० द्रक्तं रात्रि कुजार्कीणां चंद्र भौम शनीनां बलं स्याद्॥ उन्नते त्रिंशो ३० द्रक्तं पल्लब्धं तदेव परेषां रविगुरुशुक्राणां बलं स्यात्॥ तदेव रूपाद्यं बलं भवति॥ अस्योदाहरणं॥ नते २८ ५९॥ त्रिंशो ३० द्रक्तं लब्धं ०।४९।५२ रात्रि कुजार्कीणां बलं॥ नतोन्नत बलं स्यात्॥ उन्नते ५।४ त्रिंशो ३० द्र

॥२७॥

नोलब्धं रवि गुरुशुक्राणां बलं १।२०॥ बुधस्य सदा रूपं बलं १।०।० ॥ अथ पक्षबलं ॥ शुक्लेसे
इति ॥ शुक्लेसेतिथिहन्दुःतेष्यति थियोवीर्यसतां भूच्युतं पापानां द्विगुणं विधोरिदमथान्यः स्त्रिय
राके शुक्रमानां ॥ सौम्यार्कार्किगुर्वो निशाः ॥ दिवासिताराणां च रूपं सरैज्यस्याथो ग्निचयाहुली कि
लसमामासस्तु होरेश्वराः ॥ शुक्ले शुक्लपक्षे गततिथयः सावयवाग्राह्याः ॥ अंसे हृ कृष्णपक्षे
एष्यतिथयः सावयवाग्राह्याः ॥ ताः पंचदशाभिर्भाज्याः ॥ लब्धं रूपादि शुभग्रहाणां चंद्रबुधगु
रुशुक्राणां पक्षबलं स्यात् तदेव रूपा१च्युतं कार्यं ॥ पापानां पापग्रहाणां रविभौमशनैश्चरा
णां बलं स्यात् ॥ इदं अत्रागतं बलं विधोः चंद्रस्य द्विगुणं कार्यं ॥ चंद्रस्य वक्ष्यमाणचेष्टाबल
मपि पक्षबलवत्तुल्यं रूपमेव स्यात् ॥ अतः कारणात् चंद्रस्य बलं द्विगुणं कार्यं ॥ अत्र केचि
त् क्षीणचंद्रं पापग्रहमिच्छंति ॥ तदसत् ॥ पापयुक्तः बुधः पापः ॥ चंद्रस्य यवनेश्वरवाक्यबल

॥१८॥

लात्शुभत्वमेव दृश्यते॥ बुधस्य तु सर्वसंमतत्वात्पापयुक्तस्तु पापः॥ तथा च यवनेश्वरः
क्रूरग्रहोर्कः कुजसूर्यजौ च पापौ शुभाः शुक्रशशांकजीवाः॥ सौम्योस्तु सौम्यो यदि मिश्रितोन्यैः
पापैश्च तुल्यः प्रकृतिस्समेति॥१॥ सारावल्यामपि॥ शुक्लप्रतिपद्दशाके मध्यबलः कीर्तितो यव
नवृद्धैः॥ श्रेष्ठो द्वितीयदशाके स्वल्पबलश्चंद्रमास्तृतीये च॥१॥ अत्र चंद्रस्य॥ तृतीयदशाकेपा
पत्वं ब्रूयात् न स्वल्पबलत्वं॥ तथा च क्षीणचंद्रमापापइति अन्येषां मतं॥ एवं मतभेदे पद्धति
तिकारैः यवनेश्वरमतमेवांगीकृतं॥ यतश्चंद्रस्य चेष्टाकेंद्रजं पक्षबलं च सममेव मतं भव
तीति पक्षवीर्यं द्विरघ्नं चंद्रस्योक्तं॥ चंद्रस्य शुभत्वे पक्षबलं चेष्टाबलं सममेव भवती सत्रोप
हरणं॥ पौर्णिमांतेगततिथयः पंचदश १५ भाजकोपि पंचदशेति चंद्रस्य पक्षबलं रूपं पौ
र्णिमांते चंद्रस्य चेष्टाकेंद्रजं बलं रूपं॥ तद्यथा॥ व्यर्केंदुरिति ०॥ चंद्रात्सूर्ये शोधिते रा

॥१८॥

॥यद्यपि जातके सर्वत्र पापयुक्तबुधस्य पापत्वाभिधायित्वमुक्तं ॥ तथापि पद्धतौ तु पापयुक्तबुधस्य शुभत्वमेव स्वीकर्तव्यं भवति ॥ अन्यथा भावदृग्बलसा
॥धनं सर्वदा बुधदृष्टियोजनस्य व्यर्थत्वं स्यात् ॥ किंच प्रथमं पापत्वांगीकारेण दृष्टिं च चतुर्थांशशोधनं वदतः पुनर्दृष्टियोजनकथनमप्रयोजकमिति बला
॥ नयने सर्वत्र बुधस्य शुभत्वमेव बोध्यमिति सहृद्ब्रवीमि तस्मादत्र नैसर्गिकपापरविभौममंदा एव पापा ज्ञेयाः ४२ तदि ॥ ॥

षंषड्राशिपरिमितं अत्र भाजको षट् इति चंद्रस्य चेष्टाबलं रूपं इति तुल्यं ॥ अमांते एष्यतिथयः पूर्णं
भाजकः पंचदश १५ इति चंद्रस्य पक्षे बलं पूर्णं ॥ अमांते व्यर्केंदुरिति चंद्रात्सूर्ये शोधिते पूर्णं भाजको
षट् ६ इति चेष्टाबलं पूर्णं ॥ इति तुल्यं ॥ अतो द्विगुणमित्युक्तं ॥ चंद्रस्य पापत्वांगीकारे अमांते फल
द्वयतुल्यता नायातीति यथा ॥ अमांते शुभपक्षबलं पूर्णं इति प्रत्यक्षविरोधात् कृष्णपक्षे चंद्रस्य
शुभतोवेति सिद्धं ॥ द्विजराजस्य ये पापत्वं वदंति त एव पापिनः ॥ चंद्रस्य शुभत्वांगीकारात्तु क्षीण
चंद्रयोगे बुधशुभत्वेति सिद्धं ॥ अतः पद्धतौ सर्वत्र दृग्बलानयने च चक्रार्द्धहानौ तनुगे खले
इत्यादिस्थले चंद्रस्य शुभत्वे वा ॥ बुधस्य तु यथा प्राप्ता पापता शुभता वा ग्राह्या ॥ एषां मते रिष्टयो
गादौ यत्र चंद्रपापत्वाभिधानं तत्राल्पबलत्वं बोध्यं ॥ अत्र पक्षबलानयनं ॥ तत्त्रैराशिकं ॥ पंचदश १५ ॥
तिथिभिः रूपं बलं तदागतैष्यतिथिभिः किं ॥ गतैष्यतिथीनां अयनं ॥ विरविचंद्रलवाः द्वादशभि

१२ भीज्याः गततिथयो भवंति शुक्लपक्षे कृष्णपक्षे रविविचंद्रलवाः भगणांशाभां ३६० शुद्धाः
कार्याः। द्वादशाभिर्भाज्याः एष्यतिथयो भवंति॥ द्वादशाभागतुल्ये सूर्यचंद्रांतरे एका तिथिर्लभ्यते अ
तः कारणात् रविविचंद्रलवाः द्वादशाभि १२ र्भक्ताः कार्याः॥ अस्योदाहरणं॥ सूर्यः २।१४।२०।५८
चंद्रः ५।१२।२५।२२ रविविचंद्रः २।२८।४।३४ अस्य लवाः ८८।४।३४ द्वादशाभिः १२ भक्ताः॥ लब्धा
गततिथयो ७ शेषं ४।४।३४ षष्टि ६० गुणितं २४४।३४ द्वादशाभि १२ र्भक्तं लब्धं घटिकाः २० पु
नः शेषं ४।३४ षष्टि ६० गुणं २७४ द्वादशा १२ भिर्भक्तं लब्धं पला नि २२ पक्षबलार्थं गततिथिः सा
वयवा ७।२०।२२ एताः पंचदशा १५ भिर्भक्ताः लब्धं शुभग्रहाणां बलं ०।२९।२१ शुभग्रहबल
मिदं रूपात् १ शोधितं पापग्रहाणां बलं ०।३०।३९ शुभबलं द्विगुणितं ०।५८।४२ जातं चंद्रस्य
बलं॥ अप्यत्रिभाग बलं॥ अथेति दिनस्य प्रथमत्र्यंशो जन्मत हि सोम्यो बुधस्य रूपं बलं १

द्वितीयत्र्यंशे अर्कस्य रूपं बलं १।०।० तृतीयत्र्यंशे शनेः रूपं बलं १।०।० एवं रात्रेः ॥ प्रथमत्र्यंशे
चंद्रस्य ॥ द्वितीयत्र्यंशे शुक्रस्य ॥ तृतीयत्र्यंशे भौमस्य रूपं १।०।० बलं स्यात् ॥ सदा सर्वदैव ईज्यस्य गु
रोः रूपं बलं स्यादित्यर्थः ॥ अत्रोदाहरणं ॥ अत्र दिनमानं ३२।४८ तथा रात्रिमानं च २७।१२ अस्य त्र्यं
शः ९।४ रात्रेस्तृतीयत्र्यंशे जन्मास्ति अतो भौमस्य बलं रूपं १।०।० गुरोरपि रूपं बलं १।०।० किंतु
सदेज्यस्यैवोक्तत्वात् ॥ इति त्रिभागबलम् ॥ अथ वर्षादिबलमाह ॥ अथेति ॥ पादचयात् ॥ अंघ्रिवृ
द्ध्या वर्षमासदिहोरेश्वराः क्रमेण बली स्यात् ॥ अत्र जातैकवचनं ॥ एतदुक्तं भवति ॥ व
र्षाधिपो यो ग्रहो स्यात् तस्यैकपादोनबलं स्यात् ॥ यो ग्रहो मासाधिपस्तस्य पादद्वयं बलं स्यात्
यो दिनाधिपो वासरस्तस्य पादत्रयं बलं स्यात् ॥ होराधिपः कालहोराधिपस्तस्य पादचतुष्ट
यं बलं स्यात् ॥ अथ वर्षेशमासेशयोरानयनार्थं श्रीदैवज्ञकेशवाचार्यैः स्वटीकायां सु

गमोपायः द्दतः सोऽत्र लिख्यते ॥ द्विष्ठो द्युपिंडो रदघ्नो ३२ युतोऽर्कै १२ युक् खांगाग्नि ३६० हृ
खाग्नि ३० हृतः फले युते ॥ वेदै ४ र्गुणै ३ स्त्रि ३ द्वि हृते द्वि ७ शेषके स्याब्दस्तु स्येकरगेऽब्द
मासपो ॥ ७ ॥ उदाहरणं ॥ अत्रास्तु स्यादहर्गणः १४७३०५ द्विघ्नः एकत्र रदघ्न ३२ युतः २४७४३१
अपरत्रार्के १२ युतः १४७३१७ प्रथमं खांगाग्नि ३६० भिर्हृतो लब्धं ८९१० प्रथमं वेदै ४ र्गुणितं
४१२ द्वितीयं गुणयुतं ८९१३ प्रथमं त्रिगुणं १२३९ द्वितीयं द्विगुणं ९८२६ उभयत्र सप्तभक्ते सशे
षे ० ॥ ५ ॥ वर्षेशो रविः मासेशो गुरुः ॥ अथ ग्रहलाघवादहर्गणाद्वर्षेशमासेशयोरानयनार्थं
श्रीमद्गणेशदैवज्ञोक्तः प्रकारो लिख्यते ॥ द्विष्ठोऽयं ग्रहलाघवद्युनिचयश्चक्राहतेः षट्
शरैः ५६ षड्दस्रैश्च २६ युतः स्वबाणते
पनैः १२५ सेषुश्च खांगाग्निभिः ३६० भिः खा
५

र	च	मं	बु	गु	शु	श
०	०	०	०	०	०	०
३०	५८	३०	३०	२१	२१	३०
३१	४२	३१	३१	२१	२१	३१

॥ ॥ पक्षबले ॥ ॥

र	च	मं	बु	गु	शु	श
०	०	१	०	१	०	०
०	०	०	०	०	०	०
०	०	०	०	०	०	०

॥ ॥ त्रिभागबले ॥ ७ ॥

ज्यांशौ ३० विहृतः फले गुण ३ यम २ घ्ने चक्रनिघ्नाक्ष ५ रवो ० पेते द्विरात्रि ३ युतेनगो ७ वेरि
तके १ स्तोकासमामासपो १॥ अस्योदाहरणं यल्लाघव द्वि निचयः ९६ द्विघ्नः ९६ चक्रं ६ एके
चक्राहृते: षट्त्रारैः ३३६ युतः ४३२ अपरत्र चक्राहृतेः षट्दस्रै १५६ युतः २५२ प्रथमः सेबा
णतपनः ५५७ द्वितीयः सेषुः २५७ प्रथमः खांगाग्नि ३६० भिः हृतः द्वितीयः खाज्यांशैः ३० हृ
तः फलं ८ प्रथमं १ गुणघ्नं ३ द्वितीयं ८ यमघ्नं १६ प्रथमं चक्रनिघ्नाक्षैः ३० युतः ३३ द्वितीयं
चक्रघ्नं शून्ययुतं १६ प्रथमं द्वि २ युतं ३५ द्वितीयं १६ त्रि ३ भिर्युक्तं १९ उभयत्रापि सप्तभक्ते स
ति शेषे ०।५ एवं पूर्वोक्तावेव वर्षेशमासपो जातौ ॥ अथ होरेशानयने तत्रादौ वारप्रव
त्तिमाह ॥ चरार्धदेशांतरयोर्वियोग योगो स्थमानीयपले ऽथ सम्यक्॥ सूर्योदयात् ऊर्ध्वमृणे
धने ऽधो वारप्रवृत्तिं मुनयो वदंति ॥१॥ वारप्रवृत्तेर्घटिका द्विनिघ्ना कालोरवेर्होरेशपतयः

(21)

शारा ५ सा:॥ दिनाधिपाद्यार विशुक्रसौम्यचंद्रार्कि सौरेज्यकुजाः क्रमेण॥ २॥ दिनपतेः स्वकाद्वागणनात्क्रमः सूर्यः॥ शुक्रः॥ बुधः॥ चंद्रः॥ शनिः॥ गुरुः॥ भौमः॥ रेखांतः पश्चिमयोजनानि धनानि ४ स्वांशघ्नानि १ जातानि रेखांतरपलानि ३ चरपलानि ८४ ऋणानि उभयोर्धनर्णयोरंतरं ८१ ऋणं सूर्योदयादूर्ध्वं ऋणेऽस्य चेत्स्यात्सूर्योदयादूर्ध्वं १।२१ जाता वारप्रवृत्तिः॥ अथेष्टकालः ५१।२८ वारप्रवृत्तिऋणघटीभिः हीनः १।२१ जाता वारप्रवृत्तिः ५०।७ द्विनिघ्ना १००।१४ शारा ५ सा: गताः कालहोराः २० वर्त्तमान बुधहोरा दिनेशाप सिद्धः॥ अत्र चंद्रः॥ समाधीशादिबलं॥ चतुर्णां योगे कालबलचक्रम्॥ अथायनबलं तद्द्विविधं॥ अय आयनबलं॥ चेष्टाबलं च॥ तत्रादौ आयनबलं॥ स्वदेति॥ सप्ताक्रांतिभागैर्युतात्तस्य त्रिंशदा २४ त्रांनी दोर्युतोनाः क्रमाद्याम्यसौम्यैः

॥ अथग्रहाणां वर्षादिबलचक्रम्

रविः	चं	मं	बु	गु	शु	श
०	०	०	१	०	०	०
१५	५५	०	०	०	३०	०
०	०	०	०	०	०	०

॥ चतुर्णां योगे कालबलचक्रेलि·

र	चं	मं	बु	गु	शु	श
०	२	२	२	१	१	१
४५	३३	२०	३०	३९	९	२०
४०	१४	३१	३९	२९	९	२१

विलोमं परेषां गजांभोधि ४८ भक्ता नवेहायनं वीर्यमर्कस्य दृघ्नं ॥ ११ ॥ ज्ञस्य बुधस्य याम्यसौम्यैः क्रांतिभागैः याम्यसौम्यैः सदा सिद्धाः २४ चतुर्विंशति २४ युक्ताः कार्याः ॥ शनिंद्वोः शनिचंद्रयोः क्रांतिभागैः याम्यसौम्यैः क्रमात्सिद्धाः युतोनाः कार्याः याम्यैर्युक्ताः सौम्यैरूनाः ॥ परेषां रविभौमगुरुशुक्राणां विलोमं ॥ सौम्यैः क्रांतिभागैः स सिद्धाः २४ युताः कार्याः ॥ याम्यैरूनाः कार्याः ॥ सर्वे गजांभोधि ४८ भक्ता अष्टचत्वारिंशद्भक्ताः रूपाद्यायनबलं स्यात् ॥ एतदर्कस्य सूर्यस्य दृग्घ्नं द्विगुणं कार्यं ॥ यतो वक्ष्यमाणः सूर्यस्य चेष्टाबलं आयनबलं समं भवति ॥ अतः कारणात् वक्ष्यमानचेष्टाबलं भौमादीनामेवोक्तमस्ति न सूर्यचंद्रयोः ॥ यच्चंद्रस्य पक्षबलं तदेव चंद्रस्य चेष्टाबलं ॥ यत्सूर्यस्यायनबलं तदेव सूर्यस्य ष्टाबलं ॥ अतः कारणात्पूर्वमे द्विगुणं कृतं ॥ यदि तु वक्ष्यमानचेष्टाबलपक्षे सूर्यस्यायनबलतुल्यं चेष्टाबलं लिख्यते ॥ तत्प्रागानीते सूर्यस्यायनबलं चंद्रस्य पक्षबलं यथास्थितमेव स्थाप्यं न

द्विगुणीकृतमि रहायनवलार्थं प्रथमतो ग्रहाणां क्रांतयः कर्तव्याः ॥ तत्करणप्रकारश्च ग्रहला
घवे स्युः खंडानि खवाब्धयो ४० खकृता ४० शैलाग्नयो ३७ व्ध्यग्नय ३४ स्त्रिरा ३० नख २५ धृ
ती १८ न १२ वारिनिधय ४ स्तैः सायनांशै ग्रहात् ॥ बाहुंत्रा न्त्रकुभागसंख्यका युतिः शेषेश्च घाताद्
रा १० स्याद्यादि ग्वि १० हृतात्लवादिरपमस्तद्दिक् स्वगोला भवेत् ॥ १ ॥ अथ क्रांतिखंडानित
योगश्च ॥ उदाहरणं ॥ रविः २।१४।२०।५८ अयनभागाः १७।४४ सायनो रविः ३।२।४।५८ उर
स्य भुजांशाः ८७।५५।२ द्दशा १० भक्ताः लब्धं ८ गतखंडानि गतखंडकयोगः २३६ युक्तः २३९।१०।०
द्दशा १० हृतो लब्धं लवाद्यो रवेः क्रांतिरुत्तरा २३।५५।० सायनग्रहे मेषादिषड्के ६ सति उत्तरा क्रांतिः
तुलादिषड्के ६ सति दक्षिणा क्रांतिः ॥ एवं चंद्रादीनां क्रांतिसाधनं ॥ उदाहरणं ॥ बुधस्य क्रांतिभा
गाः उत्तराः २७।५६।५८ एते सिद्धाः २४ युताः ५१।५६।५८ गजांभोधि ४८ भक्ताः फलं रूपाद्यं आ

॥अथ रव्यादिग्रहाणामायनबलं॥

र·	चं·	मं·	बु·	गु·	शु·	श·
१	०	०	०	०	०	०
५९	२२	५७	५९	५९	५९	१४
४६	४	५३	५६	४८	७	७

॥अथ रव्यादीनां क्रांतिभागाः

र·	चं·	मं·	बु·	गु·	शु·	श·
२३	०	२२	२३	२३	२३	१२
५५	३	१८	५६	५१	१४	१०
०	४८	३३	५८	९	३९	१०
उ·	द·	उ·	उ·	उ·	उ·	उ·

आयनबलं बुधस्य ०।५९।५९ त्रानिक्रांतिभागाः १२।१०।१० त्रिघ्नाः २४ रूनाः ११।४९।५० गजांभोधि ४८ भक्ताः लब्धं रूपाद्यमायनबलं चंद्रेः ०।१४।७ रविक्रांतिभागाः २३।५५।०। उत्तरा विलोमे परेषा मिस्रचोत्या दैते भंगैर्युता सिद्धाः ७।५५।० गजांभोधि ४८ भक्ताल्लब्धं रूपादि बलं ०।५९।५२ अर्कस्य दृग्घ्रमिस्रचलत्वा द्विगुणितं १।५९।४६ जातं सूर्यस्यायनबलं ॥ एतत् आयनबले वै श्रित्रुत्रारसंस्कृत क्रांत्योत्पन्न दसवं ॥ तदेतदूषितं गणकचक्रचूडामणिभिः श्रीमत्स्केन्द्राचैदवशेयितो ग्रहस्य याम्योत्तरक्रांतिमुखेन अयनं गमनं क्रांतिवशादेव तदुक्तं मत्ताप्रबंधेन सिद्धांतशिरोमणौ ॥ बलानयने क्षेपः क्षिप्तोयेत्त कुकुद्धयइति ॥ अथ चेष्टबलमाह ॥ मध्यस्पष्टेति ॥ मध्यस्पष्टयुतेर्दले नित

मध्यमसूर्यः बुधकेंद्रयुतं बुधस्य शीघ्रोच्चं॥ शुक्रकेंद्रं सूर्यमध्यमयुतं शुक्रस्य शीघ्रोच्चं॥ ॥

सूर्यस्यायनवलं तदेव स्फुटचेष्टावलं सूर्यस्य॥ चंद्रस्यायनवलं पक्षबलं अनयोर्योगः स्फुटचेष्टावलं चंद्रस्य॥

चलं चेष्टाख्यकेंद्रं कुजानां स्यात्तच्चेद्भगणाच्च्युतं षडधिकं षड्भच्युतं चेष्टाबलं॥ स्यादेकोचाररूपमद्विविहृतं नैसर्गिकं स्याद्बलं मंदारज्ञसुरेज्यशुक्रशशिनस्तीक्ष्णद्युतीनां क्रमात्॥१२॥ मध्यग्रहस्पष्टग्रहयोगदलं तेन हीने शीघ्रोच्चे कुजादीनां चेष्टाकेंद्रं स्यात्॥ तच्चेत्षडधिके भगणात् १२ च्युतं कार्यं षडल्पं यथास्थि

मध्यस्पष्टग्रहयोगदलं					शीघ्रोच्चानि ॥७॥					चेष्टाकेंद्राणि ग्रहाणां					ग्रहाणां चेष्टाबलं					द्वयोर्योगे चेष्टाबलं चंद्रमसे						
मं	बु	गु	शु	श	मं	बु	गु	शु	श	मं	बु	गु	शु	श	मं	बु	गु	शु	श	र	चं	मं	बु	गु	शु	श
१ ८ १३ १२	२ २३ ५२ ३	२ ५ ३२ ५८	२ २८ ५३ ९	० १४ १ ४	२ १४ १२ २४	८ २३ ५३ ५१	२ १४ १२ २४	३ २ ५१ ४६	२ १४ १२ २४	१ ५ ५९ १२	६ ० १ ४८	० ८ ३९ २६	० ३ ५८ ३७	२ ० ११ २०	० ११ ५९ ५४	० ५६ ३९ २४	३ २ ५३ ८	० ६ २२ ५२	० २० ३ ४६	१ ५६ ४६ ०	१ ४६ ४६ ०	१ ६ ५२ ४६	१ ५६ ३५ २४	१ २ ४० ८	१ ५ ४५ ५२	० २४ ५० ४६

तएवाषड्भिर्भाज्यं चेष्टाबलं स्यात्॥ अत्र भजनप्रकारस्तूच्चबलानयनेऽक्तः सोऽत्रापेयः॥ अत्रोदाहरणं॥ मध्यमो भौमः ०।२४।४०।३८ स्पष्टः १।२१।४५।४६ युतिः २।१६।२६।२४ दलं १।८।१३।१२ मध्यमोर

वि: भौमस्यनीचोच्चं ३।१४।१२।२४ दलेन हीनं जातं भौमस्य चेष्टाकेंद्रं १।५।५९।१२ षड्हृतं भौम
स्य चेष्टाबलं ०।११।५९।४४ एवं सर्वेषां ग्रहाणां चेष्टाकेंद्राणि ॥ तथा चेष्टाबलानि च ॥ अयन बल
चेष्टाबलयोगचक्रं ॥ अथ नैसर्गिकबलमाह ॥ स्यादिति ०॥ उदाहरणं ॥ रूपं १ सप्त ७ हृतं शनेर्नै
सर्गबलं ०।८।३४ द्वयसप्तभक्तं भौमस्यबलं ०।१७।८ त्रयसप्तभक्तं बुधस्यबलं चतुर्थं ४ सप्त ७
भक्तं गुरोर्बलं ०।३४।१७ पंच ५ सप्त ७ भक्तं शुक्रस्य बलं ० ४२ ५१ षट् ६ सप्त ७ भक्तं चंद्रस्य बलं ०
५१।२५ सप्त ७ सप्त ७ भक्तं रविबलं १।०।० एवं निसर्गबलं स्यात् । स्थिरमेव ॥ युद्धेति ॥ युद्धे वाणवि
योगहृत्खचरयोर्वीर्यैक्ययोरंतरं स्वं सौम्यस्य खगे क्षयं च यमदिक्रूसंस्थं च कुर्याद्धते
सदृष्ट्यंघ्रिसुयुग्दृष्टिचरणोनं खेटवीर्यं भवेद्भावानां बलमीरितं नृचतुष्पादाख्यकी
टांबुजाः ॥१७॥ यदा कदाचिज्जन्मकाले खचरयोर्युद्धे सति तयोर्वीर्यैक्ययोरंतरं कार्यं ॥

ग्रहयोः कलात्मको बाणो कार्यो वीर्यैक्ययोरंतरं बाणयोरंतरेण भाज्यं यल्लब्धं तदुत्तरग्रहदिशि
स्थितस्य ग्रहबले सहितं कार्यं॥ दक्षिणदिशि स्थितस्य ग्रहबले हीनं कार्यं॥ अयं संस्कार
श्चेष्टाबलभेदः॥ तत्र युद्धलक्षणं युद्धं तु भौमादिपंचकस्यैव उक्तं च विष्णुगुप्तेन॥ दिव
सकरेणास्तमयः॥ समागमः शीतरश्मिसहितानां॥ कुसुतादीनां युद्धं निगद्यतेऽन्यो
न्ययुक्तानां॥१॥ नन्वेसति सूर्यसिद्धांते॥ ताराग्रहाणामन्योन्यं स्यातां युद्धसमागमो
समागमः शशांकेन सूर्येणास्तमयः सह॥२॥ ताराग्रहाणां भौमादीनां अन्योन्यस्य
युद्धस्य समागमस्य चोक्तेस्याद्भौमादीनामन्योन्यसमागमसंस्काराभावः प्रसज्येत॥ बाढं त
त्रापि संस्कारः स्वीकार्यः॥ यत्र तत्रैव भौमादीनां समागमलक्षणमुक्तं॥ समागमोऽंशाधिके
भवलश्चेद्बलान्विता इति॥ भौमादीनां समागमलक्षणाभावे अर्थाद्युद्धमेव॥ अथ दृग्बल

ग्रहाणां नैसर्गिकबलचक्रम्॥

र	चं	मं	बु	गु	शु	श	श्री
१ ० ०	० ५१ २५	० १७ ८	० २५ ४३	० ३४ १७	० ४२ ५१	० ८ ३४	० ० ०

क्ता धनु मात स दृस्यं। ग्रियुगुग्रदृष्टिचरणेन ४नं खेटवीर्यं भ
खेटवीर्यं स दृष्टं ग्रियुक्तं कार्यमिति॥ उग्रदृष्टिचरणेन कार्यं॥
एतदुक्तं भवति यं यत्रय तिग्रहाणां या दृष्टयः संति तन्मध्ये शुभग्र
हाणां दृष्टिनामैक्यं कृत्वा चतुर्थांशो ग्राह्यः। तद्धनात्मकं दृग्बलं॥ पा
पग्रहदृष्टीनामैक्यं कृत्वा चतुर्थांशो ग्राह्यः तदृणात्मकं दृग्बलं भवति॥ धनर्णदृग्बलयोरंतरं
स्फुटदृग्बलं भवति॥ उदाहरणं॥ रवेरुपरि दृष्टयः चंद्रः ०।१४।२ शनिः ०।५०।१९ शुभदृष्टेश्चतुर्थां
शो जातं दृग्बलं ०।३।३० पापदृष्टेश्चतुर्थांशो ऋणं दृग्बलं स्फुटं ०।११।२८॥ एवं चंद्रादीनामपि
ज्ञेयं॥ षड्बलैक्ये जातानि बलानि॥ अथ ग्रहाणां षड्बलान्युक्त्वा इदानीं भावानां लग्नादीनां बलं
द्वादशज्ञं स्वस्वामिजं स्यात्॥ यथा तत्र तनुभावस्य स्वामी भौमः मेषः तद्बलेनैव जातं तनुबलं ६।१०
।४।२८ अथ तन्वादिभावाः॥ एवं धनभावादीनां तन्वादीनां स्वामिबलानि नादिग्बलमाह

॥ग्रहाणां दृग्बलचक्रम्॥

सू	चं	मं	बु	गु	शु	श
०	०	०	०	०	०	०
११	१२	२	११	८	११	१२
२४	७	१७	२०	१५	५५	२६
ऊ	ऊ	ध	ऊ	ऊ	ऊ	ध

ग्रहाणां षड्बलैक्यचक्रम्

र	चं	मं	बु	गु	शु	श
६	६	६	८	७	६	५
३७	४१	१०	१४	१५	४१	११
४४	४२	४	४८	४५	३	५७
४०	५९	२८	२८	२१	१४	१८

तन्वादिद्वादशभावानां स्वामिजबलचक्रम्

त	ध	स	सु	सु	र	जा	म	ध	क	आ	व्य
६	६	८	६	६	६	६	६	७	५	५	७
१०	४१	१४	४१	३७	१४	४१	१३	२५	११	११	१५
४	३	४८	४२	४४	४८	३	४	४५	५७	५७	४५
२८	१४	२८	५९	१०	२८	१४	२८	२१	१८	१८	२१

नृचतुष्पदेति॥ येभावाः नृचतुष्पादाख्यकीटोऽबुजाः सुशायःस्युः तेक्रमेणजायाव्याद्याघ्ररव
रवभोनिताः स्युः कार्याः॥ ततोदृग्वीर्यवद्बलंसाध्यं॥ एतदुक्तंभवति॥ येनरराश्यायोभावास्तेसप्त
मभावोनिताः कार्याः॥॥ तन्वादीनांस्वामिबलानि॥ ॥ येचतुष्पदास्तेचतुर्थभावोनिताः कार्याः॥ येकी
टास्तेतनुभावोनिताः कार्याः॥ येजलचरराशास्तेदशमभावोनिताः कार्याः ततोदृग्वीर्यवद्बल

साध्यं॥ तद्यथा॥ मेषवृषधन्विसिंहाश्च चतुष्पदाः मकरपूर्वभागश्च कीटः कर्कटराशिः सरीसृपो वृश्चि
कः कथितः॥१॥ मकरस्य पश्चिमार्द्धं कुंभो मीनजलचराख्याताः॥ मिथुनतुलाधरकन्याः द्विपदा
ख्या धनुषि पूर्वभागश्च॥२॥ अत्र कुंभस्य जलचरमध्ये या गणना कृता॥ सा परमतमिति भाति
न्तरात्रिशेषे बहुसम्मतं॥ तथाहि बृहज्जातके॥ महस्यो घटी स्याद्दिनाराशिः स्वरूपं वदता श्रीमद्वराह
मिहिरेण घटीति कुंभस्वरूपमुक्तं॥ घटीघटवान् पुरुषः कुंभराशिहस्ते भवति॥ लोरामकरंदेति॥ सरि
त्कुंभो मनुजस्यैव कुंभो हस्तगमस्ति॥ न त्वनेन कुंभस्य जलचरत्वं निषिध्यंति॥ यथा कथंचित्कृज
लसंबंधेन जलत्वं चेत्तदा सस्यदहनापूर्वगाच्च कन्यैव सुक्ते कन्या कन्याराशिरपि जलचरः स्यात्॥
अतः कुंभो मनुज एव॥ अत एव श्रीमद्वराहमिहिराचार्यमताभिप्रायं जानता तत्सुतेन पृथुयशसा
षट्पंचाशिकायां मुक्तं॥ तुलाथ कन्यामिथुनं घटश्च नराशि त्रायस्तेषु शुभं वदंति अस्यो
दाहरणं यथा तत्र तनुभावः ०।२२।१२।८६ अत्र मेषराशिरस्ति॥ स च चतुष्पदराशिः चतुर्थभावेन

भावानां दिग्बलमिदं

नराश्रय	चतुष्पद	कीटराशि	जलचर		त	प	स	सु	सु	रि	जा	म	ध	क	आ	व्य
मिथुन तुला कन्या कुंभ धनपूर्वा०	मेष वृष सिंह धनु उ० मकर पूर्वभाग	कर्क वृश्चिक	मीन मकरस्य पश्चिमा०		० २६ ४७	० १७ ५७	० ४२ ८	० २६ ४७	० ११ ४	० ११ ४	० ० ०	० ५१ ४	० ० ०	० ० ०	० ३७ ५१	० २२ ८

०।१२।३६
३७ जनितः
९।९।३६
९ अयंषडे

अथतन्वादिद्वादशा भावानां दिग्बलचक्रं लिख्यते॥७॥

त०	ध०	स०	सु०	सु०	रि०	जा०	म०	ध०	क०	आ०	व्य०
६ २६ ५१ २८	६ ५८ ५४ १४	८ ५६ ४६ २८	७ ८ २९ ५९	६ ४८ ४८ ३०	८ २५ ४३ २८	६ ४७ ३ १४	७ ७ ८ २८	६ ६ ५२ २१	६ ११ ५७ १८	५ ४७ ४६ १८	७ ३७ ५१ २१

ध्विकः अतश्चयक्तो १२ छुदुः २।२०।२३।५१
ततोरस ६ भक्तो लब्धं तनुदिग्बलं ०।२६।
४७ अनेन युक्तं तनुबलं ६।२६।५१।२८ ए
वं सर्वेषां भावानां दिग्बलानि॥ अथ भावा
नां दृग्बलमाह॥ सदृष्ट्यंघ्रियुगुयदृष्टिच
रणो ४ नमिति॥ भावंप्रतियादृष्टयः संतितन्मध्ये शुभदृष्टेः चतुर्थांशो ४ स्वामिबलसहितदिग्ब
लेन युक्तः कार्यः॥ पापग्रहदृष्टेश्चतुर्थांशो ४ हीनः कार्यः॥ तत्र रकलया बुधदृष्ट्या गुरुदृष्ट्याच यु

युतं कार्यं ॥ तन्वादिद्वादशभावानां स्फुटबलं भवति ॥ अस्योदाहरणं ॥ तनु भावोपरि रव्यादीनां दृष्टयः
सूर्य ०।०।० चंद्र ०।४।०।६ भौम ०।०।० बुध ०।०।० गुरुः ०।०।० शुक्र ०।१।३० शनि ०।०।० शुभदृष्टियो
गः ०।४।१।३६ अस्यां घ्रिः ०।१०।२४ धनाख्यं दृग्बलं ॥ पापग्रहदृष्टियोगः ०।०।० अस्यां घ्रिऋणाख्यं
धनर्णयोरंतरे दत्ते शेषं दृग्बलं कार्यं ०।१०।२४ धनाख्यं दृग्बलं ॥ एतच्च तनुभावबले ६।३६।५१।
२८ युक्तं ६।४७।१५।२८ सकलयावुधगुरुदृष्ट्या ०।०।० युक्तं यावत् तनुभावबलं स्पष्टं ६।४७।१५।२८ तनु
भावोपरि दृष्टयः ॥ सूर्य ०।१६।२७ चंद्र ०।०।० भौम ०।५१।४ बुध ०।७।१६ बृहस्पति ०।२२।२९ अथ

॥ अथ तन्वादिद्वादशभावानां दृग्बलचक्रं लिख्यते ॥

त	ध	स	सु	सु	रि	जा	म	ध	क	आ	व्य
०	०	०	०	०	०	०	०	०	०	०	०
१०	०	११	११	१९	२२	४६	४६	३९	४	३४	४६
२८	०	२४	२८	२७	३९	३४	४६	५२	८	३४	३६
५	५०	३०	३०	५०	५०	५०	५०	५०	५०	५०	५०

॥ अथ तन्वादिद्वादशभावानां स्फुटबलानि ०

त	ध	स	सु	सु	रि	जा	म	ध	क	आ	व्य
६	७	८	६	७	८	७	७	९	७	७	८
७	२४	४५	७	८	४८	३	१९	४८	२९	११	१४
१५	५४	२२	१	१५	२१	३४	५१	४४	५	२९	३२
२८	१४	२८	५२	३०	२८	१४	२८	२१	१८	१८	२१

27

शुक्रः ०।१।०।५ शनिः ०।२।१।५० शुभदृग्योगः ०।३।२।३० अस्यां घ्रिः ०।८।०।७ धनाख्यं ॥ पापग्रहैर्दृष्टि
योगः १।५।२।३१ अस्यां घ्रिः ०।२।८।९ ऋणाख्यं ॥ धनऋणयोरंतरे कृते शेषं ऋणं ०।२०।२।६६ शुभ
गुरुदृष्टियोगेन ०।३।९।२४ धनेन युतं ०।१४।२७ जातं सुतभावदृग्बलं ॥ एतद्दृग्बलं युतं सुतभाव
बलेध ०।८।०।३० युतं जातं सुतभावबलं स्पष्टं ७।८।१५।३० एवं सर्वेषां भावानां बलसाधनं ॥ इति श्री
नृदिवाकरदैवज्ञात्मजविश्वनाथदैवज्ञविरचिते श्रीकेशवदैवज्ञविरचितपद्धतिस्तनान्तरे भावब
लसाधनाध्यायोदाहरणं ॥ ७॥ अथ रश्मीष्टकष्टसाधनाय अर्कचंद्रयोश्चेष्टाकेंद्रे बलं चा
ह॥ ७॥ ॥ ७॥ व्यर्केंदुरिति अस्यार्थः सूर्येणहीनः इंदुः चंद्रस्य चेष्टाकेंद्रं भवति राशित्रयाऽन्वि
